वामे खजघने यत्नादारोप्य शिरसी तयोः ।
जगदाधारभूतः स सर्व्वयत्नेन संयुतः ॥
सर्व्वैर्बलैः समाक्रम्य चिच्छेद स पृथक् पृथक् ।
मधुकैटभयोः सम्यक् वीरयोः पृथिवीोपरि ॥
तस्य चाक्रम्य संस्थानाद्ब्रह्मशक्तिरधोगता ।
धियमाणापि देवीचैर्यैनादपि मुहुर्मुहुः ॥
ततस्तयोस्तु न्हतयोः शरीरे जगतां पतिः ।
ब्रह्मशक्तिं समुद्धृत्य यथास्थां प्रयत्नतः ।
उद्धृतायां पृथिव्यान्तु तयोर्मेदोविलेपने ।
सुदृढामकरोत् पृथ्वीं छादितां तोयराशिभिः ॥
मेदोविलेपिता यस्मात् गीयते मेदिनीति सा ।
अद्यापि पृथिवी देवी देवमातृभराचर्षे ॥"
इति कालिकापुराणे ६१ अध्यायः ॥
(अनयोर्नामनिरुक्तिर्यथा, महाभारते । १२ ।
३४७ । २४—२६ ।
"सत्त्वस्थः परमेष्ठी स ततो भूतगणान् सृजन् ।
पूर्व्वमेव च पद्मस्य पत्रे सूर्य्यांशुसप्रभे ।
नारायणकृतौ बिन्दू अपामास्तां गुणोत्तरौ ।
तावपश्यत् स भगवाननादिनिधनोऽच्युतः ॥
एकस्तत्राभवद्बिन्दुर्मध्वाभो रुचिरप्रभः ।
स तामसो मधुर्जातस्तदा नारायणाज्ञया ।
कठिनस्त्वपरो बिन्दुः कैटभो राजसस्तु सः ॥")
मधुकोषः, पुं, (मध्वर्थं कृतः कोषः मध्वाधारः कोषो वा ।) मधुमक्षिकाकृतकोषः ॥ मौचाक् इति भाषा । तत्पर्य्यायः । मधुक्रमः२ । इति शब्दचन्द्रिका । (यथा,—
"भ्रमरेणेव मयायं वाख्यामधुकोष आरब्धः ।"
इति रविनिवसटीकाकृद्विजयेन लिखितम् ।)
छागस्तुष्क इति मांसाशिनो वदन्ति ॥
मधुक्रमः, पुं, (मधुनः क्रमः ।) पुनः पुनर्मधुपानक्रमः । तत्पर्य्यायः । मधुवारः २ । इत्यमरः । २ । १० । ४१ ॥ मधुकोषः । इति शब्दचन्द्रिका ॥
मधुक्षीरः, पुं, (मधुवत् क्षीरं निर्य्यासोऽस्य ।) खर्ज्जूरवृक्षः । इति हारावली ॥
मधुखर्ज्जूरिका, स्त्री, (मधुर्मधुरा खर्ज्जूरी । ततः कन् टाप् । पूर्व्वस्य ह्रस्वत्वम् ।) खर्ज्जूरविशेषः । तत्पर्य्यायः । मधुकर्क्कटिका २ कोलकर्क्कटिका ३ कण्टकिनी ४ मधुफलिका ५ माध्वीमधुरा ६ मधुरखर्ज्जूरी ७ मधुखर्ज्जूरी ८ । अस्या गुणाः । मधुरत्वम् । हृद्यत्वम् । सन्तापपित्तशान्तिकारित्वम् । शिशिरत्वम् । जन्तुकर्तृत्वम् । बहुवीर्य्यविवर्द्धनत्वञ्च । इति राजनिर्घण्टः ॥
मधुगायनः, पुं, (मधु गायतीति । गै + "ल्युट् च ।" ३ । ३ । ११७ । इति ल्युट् । यद्वा, मधौ वसन्ते गायन इति सप्तमीसमासः ।) कोकिलः । इति राजनिर्घण्टः ॥
मधुगुञ्जनः, पुं, (मधु मधुरं गुञ्जनमस्य । पवनेरितशुष्कफलशब्दस्यास्य मधुरत्वात् तथात्वम् ।) शोभाञ्जनवृक्षः । इति शब्दमाला ॥
मधुघोषः, पुं, (मधुर्मधुरो घोषो यस्य ।) कोकिलः । इति शब्दमाला ॥

मधुच्छदा, स्त्री, (मधुः मधुरश्छदः पर्णमस्याः । यद्वा मधु छादयति रसाधिक्येन पराभवतीति छद + णिच् । घः । घे ह्रस्वश्च ।) मयूरशिखा । इति भावप्रकाशः ॥ (तथास्या गुणाः ।
"नीलकण्ठशिखा लघ्वी पित्तश्लेष्मातिसारजित् ॥"
इति च भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ।)
मधुजं, क्ली, (मधुनो जातम् इति । जन + डः ।) सिक्थकम् । इति राजनिर्घण्टः ॥
मधुजम्बीरः, पुं, (मधुर्मधुरो जम्बीरः ।) मधुरजम्बीरः । इति राजनिर्घण्टः ॥
मधुजा, स्त्री, (मधोः मधुमेदसो जाता प्रादुर्भूता इति । जन + डः टाप् ।) पृथिवी । इति शब्दचन्द्रिका ॥ (मधुनो जायते या इति । जन + ड ।) सिता । तत्पर्य्यायः । मध्वसिता २ । इति त्रिकाण्डशेषः ॥
मधुजित्, पुं, (मधुं मधुनामानं दैत्यं जितवानिति । जि + क्विप् । तुगागमश्च ।) विष्णुः । इति शब्दरत्नावली ॥ (यथा, देवीभागवते ।१।५।६२।
"शिवे ! किं वा कृता विविदिषि शक्तिं मधुजितः ॥")
मधुतृणं, क्ली, (मधुरं तृणम् ।) इक्षुः । इति त्रिकाण्डशेषः ॥ (गुडादयोऽस्य इक्षुशब्दे ज्ञातव्याः ॥)
मधुतृणः, पुं, (मधुर्मधुरस्तृणः ।) इक्षुः । इति राजनिर्घण्टः ॥ (अस्य पर्य्यायो यथा,—
"महारसोऽसिपत्रः स्यात्तृणपुष्पो मधुतृणः ।
इक्षुर्वंशककान्तारभीरुपौण्ड्रादिभेदवान् ॥"
इति वैद्यकरत्नमालायाम् ॥
"इक्षुर्दीर्घच्छदः प्रोक्तस्तथा भूरिरसोऽपि च ।
गुडमूलोऽसिपत्रश्च तथा मधुतृणः स्मृतः ॥"
इति च भावप्रकाशस्य पूर्व्वखण्डे द्वितीये भागे ।)
मधुत्रयं, क्ली, (मधूनां मधुरद्रव्याणां त्रयम् ।) मधुरत्रयम् । इति राजनिर्घण्टः ॥ (मधुघृतसितात्रयम् ॥)
मधुदीपः, पुं, (मधौ वसन्ते दीप्यते इति । दीप + कः ।) कामदेवः । इति हेमचन्द्रः । २ । १४१ ॥
मधुदूतः, पुं, (मधोर्वसन्तस्य दूत इव । वसन्तागमनात् प्रागस्य सुकुलोद्गमदर्शनात् तथात्वम् ।) आम्रवृक्षः । इति त्रिकाण्डशेषः ॥ (तथास्य पर्य्यायः ।
"आम्रः प्रोक्तो रसालश्च सहकारोऽतिसौरभः ।
कामाङ्गो मधुदूतश्च माकन्दः पिकवल्लभः ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)
मधुदूती, स्त्री, (मधोर्वसन्तस्य दूतीव ।) पाटलावृक्षः । इति भावप्रकाशः ॥ (पर्य्यायादि विवरणमस्याः पाटलाशब्दे द्रष्टव्यम् ॥)
मधुद्रः, पुं, (मधुने द्राति पुष्पात् पुष्पं गच्छतीति । द्रा + कः ।) भ्रमरः । इति त्रिकाण्डशेषः ॥
मधुद्रवः, पुं, (मधुर्मधुरो द्रवो निर्य्यासोऽस्य ।) रक्तशिग्रुः । इति शब्दरत्नावली ॥
मधुद्रुमः, पुं, (मध्वर्थं मद्यार्थं मद्योत्पादको वा द्रुमः । तत् पुष्पेभ्यो मद्यसम्भवादस्य तथात्वम् ।)

वृक्षविशेषः । मौलगाछ इति भाषा ॥ तत्पर्य्यायः । मधूकः २ गुडपुष्पः ३ । इत्यमरः ।२।४।२७॥ (पर्य्यायान्तरमस्य यथा, वैद्यकरत्नमालायाम् ।
"मधुपुष्पो मधूकश्च गुडपुष्पो मधुद्रुमः ॥")
मधुधातुः, पुं, (मधुना तत्पर्य्यायनाम्ना प्रसिद्धो धातुः ।) माक्षिकम् । इति राजनिर्घण्टः ॥ (तथास्य पर्य्यायः ।
"स्वर्णमाक्षिकमाख्यातं तापीजं मधुमाक्षिकम् ।
ताप्यं माक्षिकधातुश्च मधुधातुश्च स स्मृतः ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)
मधुधूलिः, स्त्री, (मधुर्मधुरा धूलिरिव ।) खण्डः । इति हेमचन्द्रः । ३ । ६ ॥ खाँड् इति भाषा ॥
मधुधेनुः, स्त्री, (मधुरचिता धेनुः ।) दानार्थमध्वादिनिर्म्मितसवत्सा गौः । यथा,—
होतोवाच ।
"मधुधेनुं प्रवक्ष्यामि सर्व्वपातकनाशिनीम् ।
अनुलिप्ते महीपृष्ठे कृष्णाजिनकुशोत्तरे ॥
धेनुं मधुमयीं कृत्वा संपूर्णां घटषोडशैः ।
चतुर्थेन तथांशेन वत्सकं परिकल्पयेत् ॥
सौवर्णन्तु मुखं कृत्वा शृङ्गाण्यगुरुचन्दनैः ।
पृष्ठं ताम्रमयं कृत्वा सास्नां पट्टमयीं तथा ॥
पदानिक्षुमयान् कृत्वा सितकम्बलकम्बलाम् ।
मुखं गुडमयं कृत्वा जिह्वां शर्करया तथा ।
ओष्ठौ पुष्पमयौ तस्या दन्ताः फलमयाः स्मृताः ।
दर्भरोमधरा देवी रौप्यखुरविभूषिता ॥
प्रशस्तपत्रश्रवणा प्रमाणात् परितस्ततः ।
सर्व्वलक्षणसंयुक्ता सप्तधान्यान्विता तथा ॥
पलानि तिलपात्राणि चतुर्द्दिक्ष्वपि स्थापयेत् ।
छादितां वस्त्रयुग्मेन घण्टाभरणभूषिताम् ।
कांस्योपदोहनीं कृत्वा गन्धपुष्पैस्तु धूपिताम् ॥
अयने विषुवे पुण्ये व्यतीपाते दिनक्षये ।
संक्रान्त्यामुपरागे च सर्व्वकालं यदृच्छया ॥
द्रव्यब्राह्मणसम्पत्तिं दृष्ट्वा तान्तु प्रदापयेत् ।
ब्राह्मणाय दरिद्राय श्रोत्रियायाहिताग्नये ॥
आर्य्यावर्त्ते समुत्पन्ने वेदवेदाङ्गपारगे ।
ताडशाय प्रदातव्या मधुधेनुर्नरोत्तम ! ॥
पुच्छदेशोपविष्टस्तु गन्धधूपादिपूजिताम् ॥
आच्छाद्य वस्त्रयुग्मेन मुद्रिकाकर्णपत्रकैः ।
स्वशक्त्या दक्षिणां दत्त्वा वित्तशाठ्यविवर्जितः ।
जलपूर्व्वन्तु कर्त्तव्यं पश्चाद्दानं समर्पयेत् ॥
रसद्रा सर्व्वदेवानां सर्व्वभूतहिते रता ।
प्रीयन्तां पितृदेवाश्च मधुधेनो ! नमोऽस्तु ते ॥
एवमुच्चार्य्य तां धेनुं ब्राह्मणाय निवेदयेत् ॥
अहं गृह्णामि त्वां देवि ! कुटुम्बार्थे विशेषतः ।
कामं कामदुघे कामां मधुधेनो ! नमोऽस्तु ते ॥
मधुवातेतिमन्त्रेण दद्यादाशु त्रिकेण तु ।
दत्त्वा धेनुं महाराज ! छत्रकोपानहौ तथा ।
एवं यः कुरुते भक्त्या मधुधेनुं नराधिप ! ।
दत्त्वा दानं पायसेन मधुना च दिनं नयेत् ॥
ब्राह्मणोऽपि त्रिरात्रन्तु मधुपायससंयुतम् ।
एवं कृते तु यत् पुण्यं तन्निबोध नराधिप ! ॥
यत्र नद्यो मधुवहा यत्र पायसकर्द्दमाः ।